# ॥ श्री नृसिंहकृपावलोकनप्रार्थनास्तुतिः ॥

श्री कृष्ण उवाच -

सुलभो भक्तियुक्तानां दुर्दर्शो दुष्टचेतसाम् ।
अनन्यगतिकानां च प्रभुः भक्तैकवत्सलः ॥ १ ॥

शनैश्चरस्तत्र नृसिंहदेवस्तुतिं चकारामलचित्तवृत्तिः ।
प्रणम्य साष्टांगमशेषलोककिरीटनीराजितपादपद्मम् ॥ २ ॥

शनिरुवाच -

यत्पादपंकजरजः परमादरेण
संसेवितं सकलकल्मषराशिनाशम् ।
कल्याणकारणमशेषनिजानुगानां
स त्वं नृसिंह मयि धेहि कृपावलोकम् ॥ ३ ॥

सर्वत्र चंचलतया स्थितया च लक्ष्म्या
ब्रह्मादिवंद्यपदया स्थिरया न्यसेवि ।
पादारविंदयुगलम् परमादरेण
स त्वं नृसिंह मयि धेहि कृपावलोकम् ॥ ४ ॥

यद्रूपमागमशिरःप्रतिपाद्यमाद्य-
माध्यात्मिकादिपरितापहरं विचिंत्यम् ।
योगीश्वरैरपगताखिलदोषसंघैः
स त्वं नृसिंह मयि धेहि कृपावलोकम् ॥ ५ ॥

प्रह्लादभक्तवचसा हरिराविरासीः
स्तंभे हिरण्यकशिपुं य उदारभावः ।
ऊर्वोर्निधाय तदुरे नखरैर्ददार
स त्वं नृसिंह मयि धेहि कृपावलोकम् ॥ ६ ॥

यो नैजभक्तमनलांबुधिभूधरोग्र-
शृंगप्रपातविषदंतिसरीसृपेभ्यः ।
सर्वात्मकः परमकारुणिको ररक्ष
स त्वं नृसिंह मयि धेहि कृपावलोकम् ॥ ७ ॥

यन्निर्विकारपररूपविचिंतनेन
योगीश्वरा विषयवीतसमस्तरागाः ।
विश्रांतिमापुरविनाशवतीं पराख्यां
स त्वं नृसिंह मयि धेहि कृपावलोकम् ॥ ८ ॥

यद्रूपमुग्रमरिमर्दनभावशालि-
संचिंतनेन सकलाहवभीतिहारि ।
भूतज्वरग्रहसमुद्भवभीतिनाशं
स त्वं नृसिंह मयि धेहि कृपावलोकम् ॥ ९ ॥

यस्योत्तमं यश उमापतिपद्मजन्म-
शक्रादिदैवतसभासु समस्तगीतम् ।
श्रुत्यैव सर्वशमलप्रशमैकदक्षं
स त्वं नृसिंह मयि धेहि कृपावलोकम् ॥ १० ॥

श्री कृष्ण उवाच -

ऐवं श्रुत्वा स्तुतिं देवः शनिना कल्पितां हरिः ।
उवाच ब्रह्मवृंदस्थं शनिं सद्भक्तवत्सलः ॥ ११ ॥

श्री नृसिंह उवाच -

प्रसन्नोहं शने तुभ्यं वरं वरय शोभनम् ।
यं वांछसि तमेव त्वं सर्वलोकहितावहम् ॥ १२ ॥

॥ श्री नृसिंहकृपावलोकनप्रार्थनास्तुतिः ॥

श्री शनैश्चर उवाच -

नृसिंह त्वं मयि कृपां कुरु देव दयानिधे ।
मद्वासरस्तवप्रीतिकरः स्याद्देवतापते ॥ १३ ॥

मत्कृतं त्वत्स्तवं ये वै शृण्वंति च पठंति च ।
सर्वान् कामान् पूरयेथास्तेषां त्वं लोकभावन ॥ १४ ॥

शि नृसिंह उवाच -

तथैवास्तु शनेऽहं वै रक्षोभुवनमास्थितः ।
भक्तकामान् पूरयिष्ये त्वं ममैकं वचः शृणुः ॥ १५ ॥

त्वत्कृतं मत्परं स्तोत्रं यः पठेच्च शृणोति यः ।
द्वादशाष्टमजन्मस्थं तद्भयं मास्तु तस्य वै ॥ १६ ॥

शनिर्नरहरिं देवं तथेति प्रत्युवाच ह ।
ततः परमसंतुष्टाः जयेति मुनयोऽवदन् ॥ १७ ॥

शी नृसिंह उवाच -

इत्थं शनैश्चरस्याथ नृसिंहदेवसंवादमेतत् स्तवनं च मानवः ।
श्रुणोति यः श्रावयते च भक्त्या सर्वान्यभीष्टानि च विंदते ध्रुवम् ॥ १८ ॥

॥ इति भविष्योत्तरपुराणे रक्षोभुवनप्रस्तावे शनैश्चरकृता श्री नृसिंहकृपावलोकनप्रार्थनास्तुतिः ॥